# Nataraja Ashtakam

# नटराजाष्टकम्

## Document Information

Text title : naTarAjAShTakam

File name : naTarAjAShTakam.itx

Category : shiva

Location : doc_shiva

Latest update : October 3, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 3, 2021

*sanskritdocuments.org*

# नटराजाष्टकम्

कुञ्जरचर्मकृताम्बरमम्बुरुहासनमाधवगेयगुणं
शङ्करमन्तकमानहरं स्मरदाहकलोचनमेणधरम् ।
साञ्जलियोगिपतञ्जलिसन्नुतमिन्दुकलाधरमब्जमुखं
मञ्जुलशिञ्जितरञ्जितकुञ्चितवामपदं भज नृत्यपतिम् ॥ १॥

पिङ्गलतुङ्गजटावलिभासुरगङ्गममङ्गलनाशकरं
पुङ्गववाहमुमाङ्गधरं रिपुभङ्गकरं सुरलोकनतम् ।
भृङ्गविनीलगलं गणनाथसुतं भज मानस पापहरं
मङ्गलदं वररङ्गपतिं भवसङ्गहरं धनराजसखम् ॥ २॥

पाणिनिसूत्रविनिर्मितिकारणपाणिलसड्डमरूत्थरवं
माधवनादितमर्दलनिर्गतनादलयोद्धृतवामपदम् ।
सर्वजगत्प्रलयप्रभुवह्निविराजितपाणिमुमालसितं
पन्नगभूषणमुन्नतसन्नुतमानम मानस साम्बशिवम् ॥ ३॥

चण्डगुणान्वितमण्डलखण्डनपण्डितमिन्दुकलाकलितं
दण्डधरान्तकदण्डकरं वरताण्डवमण्डितहेमसभम् ।
अण्डकराण्डजवाहसखं नम पाण्डवमध्यममोदकरं
कुण्डलशोभितगण्डतलं मुनिवृन्दनुतं सकलाण्डधरम् ॥ ४॥

व्याघ्रपदानतमुग्रतरासुरविग्रहमर्दिपदाम्बुरुहं
शक्रमुखामरवर्गमनोहरनृत्यकरं श्रुतिनुत्यगुणम् ।
व्यग्रतरङ्गितदेवधुनीधृतगर्वहरायतकेशचयं
भार्गवरावणपूजितमीशमुमारमणं भज शूलधरम् ॥ ५॥

आसुरशक्तिविनाशकरं बहुभासुरकायमनङ्गरिपुं
भूसुरसेवितपादसरोरुहमीश्वमक्षरमुक्षधृतम् ।
भास्करशीतकराक्षमनातुरमाश्वरविन्दपदं भज तं
नश्वरसंसृतिमोहविनाशमहस्करदन्तनिपातकरम् ॥ ६॥

भूतिकरं सितभूतिधरं गतनीतिहरं वरगीतिनुतं
  भक्तियुतोत्तममुक्तिकरं समशक्तियुतं शुभभुक्तिकरम् ।
भद्रकरोत्तमनामयुतं श्रुतिसामनुतं नम सोमधरं
  स्तुत्यगुणं भज नित्यमगाधभवाम्बुधितारकनृत्यपतिम् ॥ ७॥

शूलधरं भवजालहरं निटिलाग्निधरं जटिलं धवलं
  नीलगलोज्वलमङ्गलसद्गिरिराजसुतामृदुपाणितलम् ।
शैलकुलाधिपमौलिनतं छलहीनमुपैमि कपालधरं
  कालविषाशमनन्तमिलानुतमद्भुतलास्यकरं गिरिशम् ॥ ८॥

चित्तहरातुलनृत्तपतिप्रियवृत्तकृतोत्तमगीतिमिमां
  प्रातरुमापतिसन्निधिगो यदि गायति भक्तियुतो मनसि ।
सर्वसुखं भुवि तस्य भवत्यमराधिपदुर्लभमत्यधिकं
  नास्ति पुनर्जनिरेति च धाम स शाम्भवमुत्तममोदकरम् ॥ ९॥

इति नटराजाष्टकं सम्पूर्णम् ।

*Nataraja Ashtakam*

pdf was typeset on October 3, 2021

Please send corrections to *sanskrit@cheerful.com*